श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्री भद्राचलपञ्चाशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भद्राचलपञ्चाशत् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

भवाब्धिमध्ये भ्रमताञ्जनानां
    भयं विधून्वन् पदभक्तिभाजाम्।
भद्राचलाग्रं परिभूषयन् सन्
    भद्रं विधत्तां मम रामभद्रः॥ 1 ॥

गोदावरीमङ्कतलस्थितायै
    सन्दर्शयन् पुण्यतमप्रवाहाम्।
पुरस्स्थितां पुण्यजनैर्विहीनां
    पूर्वानुभूतां पुलिनाभिरामाम्॥ 2 ॥

श्रीरामदासेन समादरेण
    दत्तानि हृद्यानि विभूषणानि।
वहन्निजाङ्गे वदने च मन्द -
    स्मितं मदन्तः कुरुते विहारम्॥ 3 ॥

सुदर्शनं लक्ष्मणमित्युदारं
    पार्श्वे स्फुरन्तं भयदं रिपूणाम्।
सन्दर्शयन्तं धनुरावहन्तं
    श्रीरामभद्रं शरणं गतोऽस्मि॥ 4 ॥

गोदावरीस्नानविधूतपापान्
अभ्यागतानालयमण्डपान्तः।
आनन्दयन्नानतमौलिभागान्
आत्मप्रदानेन विभुर्विभाति॥ 5॥

आगस्वी नितरामहं कथमयं भद्राचलाधीश्वरः
आलोकं मयि पातयेदिति नहि त्वं चिन्तयान्तस्सदा।
आगस्विन्यहमस्मि वत्स नितरां तस्मिन् प्रभौ मामसौ
संपश्यन् सह सीतया वितनुते रामः प्रसादं मुहुः॥ 6॥

“आगः किं रचितं त्वया रघुपतौ गोदावरीदं वद
स्वामिन्यम्ब !” “शृणुष्व वत्स ! तदिदं सीता च नीता यदा।
दृष्टा वेति तदा वदेति रघुराट् माऽपृच्छदंहो ! मया
दृष्टा सेति न दत्तमुत्तरमितः को वाऽपराधो महान्” ॥ 7॥

“केनैवं रचितं त्वया ?” “ननु भिया नक्तञ्चराधीश्वरात्
गृध्रो हन्त ! भयं विहाय निपुणः कृत्वा रणं रक्षसा।
लब्ध्वा दुर्लभमुच्चकैः पदमहो ! क्रीडां स धत्तेऽधुना
तद्वद्वा नरकेऽपि साहमभवं संवञ्चिता स्वात्मना” ॥ 8॥

क्रुद्धोऽयं गत एव मत्तटभुवश्शोकेन तान्तः प्रभुः
साऽहं पापमहो विधाय महितं तप्ताऽन्तरङ्गे भृशम्।
मत्पाथः कृतमज्जनेन मुनिना श्रीरामदासेन च
प्रीतात्मा भगवानिह स्थित इति श्रीमान् हि मां प्रेक्षते॥ 9॥

“मध्ये ते मुनिराण्मुखास्समभवन् त्वन्नीरक्लृप्ताप्लवाः
मन्मध्ये क इवास्ति” “साहमधुना मन्नीरक्लृप्ताप्लवम्।
द्रक्ष्यन्त्येष” दयानिधी रघुपतिस्सीतासमेतस्सुखं
भद्रागस्य शिरोविहाररसिकश्चिन्तामिमां तत्त्यज॥ 10॥

श्रीरामदासो रचितप्लवोऽभूत्
मन्नीरपूरे महनीयकीर्तिः।
ततः प्रसादं मयि संविधत्ते
महानुभावो मनुवंशदीपः॥ **11** ॥

मयि स्वपुण्यं किल सङ्गमय्य
मत्पापमङ्गीकृतवानिवायम्।
अतो हि कारागृहवासमुख्यम्
अवाप कृच्छ्रं ननु रामदासः॥ **12** ॥

श्रीरामदासार्थमयं महात्मा
तुरुष्कराजस्य गृहं प्रविश्य।
उच्छिष्टमप्यस्य करेण धृत्वा
तं वासदेशञ्च चकार शुद्धम्॥ **13** ॥

सन्तीर्य मां सानुज एष मत्क -
नीराध्वनामामनघां विधाय।
पश्येति सीतां मयि सन्निवेश्य
गिरौ स्थितां भाग्यपुरीमयासीत्॥ **14** ॥

ततो निवृत्तश्च विभुस्तथैव
मदम्बु संस्पृश्य मनोहराङ्गः।
महीधरं भद्रमिहारुरोह
श्रीरामभद्रस्तमिमं भजस्व॥ **15** ॥

गोदावरि ! त्वं मयि संप्रसन्ना
मया कृतं किन्नु तपो न जाने।
गोदा वरा त्वं वरदा च गोदा
गोदावरीति प्रथिता ततोऽसि॥ **16** ॥

जानामि सा त्वां वडुवूर्स्थितस्य
श्रीरामभद्रस्य दिने दिने त्वम्।
अङ्गाश्रयां श्रीसुषमामनर्घाम्
आपीय नेत्रेण पवित्रदेहः॥ **17** ॥

श्रीमञ्जुरामायणकाव्यकर्ता
वाल्मीकिरामायणपाठकस्त्वम्।
श्रीरामभक्तस्य महात्मनस्त्वं
पुत्रोऽसि दत्तो रघुपुङ्गवेन॥ **18** ॥

गोदावरि ! श्रीमति ! वारितस्ते
निवारितास्मत्कलुषे ! नमस्ते।
पूतोऽस्मि ते नीरकृतावगाहात्
नन्तुं प्रभुं यामि मयि प्रसीद॥ **19** ॥

घटान्तराविश्य घटादिनेतुः
स्कन्धे निविष्टा गमनं विधत्से।
तस्याभिषेकञ्च ततो विधाय
शीतन्तमेनं समये वदेत्थम् (वद त्वम्)॥ **20** ॥

मयाऽपि स त्वं कृपया स्वयाऽपि
जातार्द्रभावस्तममुं विलोक्य।
निजं जनं नाम विधाय नित्यं
संसारतापात् परिपालयेति॥ **21** ॥

गोदावरीतीर्थकृताभिषेकं
जायानुजालङ्कृतपार्श्वभागम्।
आलिङ्गितुं वाञ्छति मामकीना
मतिस्स्वसा पङ्क्तिमखस्य किं नु ?॥ **22** ॥

नाहं दशास्यभगिनी जनकात्मजाया:
    साऽहं सखी तव पदाम्बुजधारिणीति।
तन्नास्ति भीतिरथ मत्सविधे सदा त्वं
    सीतायुतो (सीतायुता) वस तवास्तु सदानुभूतिः॥ 23॥

निद्रायुक्तनिजानुजातसहिता निद्राविहीनाऽनुभूः
    रुद्राकारखरादिराक्षसहतौ सद्राजवंशोदित !।
मद्रामेति समागतास्य सविधं सद्राम ! सीतास्त्रिया
    भद्राण्यस्य विधाय रक्ष भगवन् ! भद्राचलाधीश्वर !॥ 24॥

"मातः !" "वातज !" "केन नाऽत्रभवती रामाय रक्षोहृतां
    सीतां नाऽकथयत् ?" "भयङ्करमुखाद्भीताऽस्मि तस्मादहम्"।
"का भीतिस्तव ? कार्तवीर्यवनिताश्श्री नर्मदाजीवने
    क्रीडावस्तु विधाय तद्बहुमुखं नर्म ह्यकुर्वन् वरम्"॥ 25॥

"धीरास्ता: खलु कार्तवीर्यवनिता: श्रीकार्तवीर्याश्रयाः"
    "त्वं रामं न हि संश्रिता" "श्रितवती सीताऽपि साऽवेपत।
कामं का नु तदाहम् ?" "इत्ययि ! मनो जानामि नो केन ते
    सीता हि क्षमया सुताऽत्र जनिता साक्षात् क्षमेवाऽभवत्"॥ 26॥

गोदा वरीयस्यवनौ सरित्सु
    गोदावरीति त्वमसि प्रसिद्धा।
गोशब्दवाच्यं सुभगं समस्तं
    स्नानेन लोकास्त्वदमी लभन्ते॥ 27॥

गोदावरित्वं सरितां भजन्तीं
    स्नातो जनान्स्त्वं सरितां वरेति।
विधिर्विधत्ते किमसौ विधाय
    गोदावरीत्यत्र किमाजुहाव ?॥ 28॥

मातासि गोदेति वरीयसी त्वं
सीताऽथ कन्या तव तत्त्वमेतत्।
माता यदीया धरणी किलाऽऽसीत्
श्रीधन्विनव्याख्यपुरेऽत्र गोदा ॥ 29 ॥

सा च (स) क्षमाऽभूद्धरणी तदानीं
तथैव सा त्वं च सुयुक्तमेतत्।
गोदाऽसि गां केन विभावदाना
"प्रत्युत्तरत्वेन न युक्तमेतत्" ॥ 30 ॥

त्वं वातजातोऽसि पिता कथं ते
सर्वत्र वृत्तिं सततं वितन्वन्।
रामाय नो वेदयति स्म सीतां
तत्त्वं विचिन्त्यैतदये ! मुनिस्स्याः ॥ 31 ॥

"कावेरी सरिदेव ते बहुमता" "गोदावरीदं कुतः ?"
"सा हि त्वत्सहजा" "कथं नु ?" "मरुता वृद्धा हि सा त्वं यथा"।
"गोदे ! मे स गुरुर्दिवीह भुवि सा गोदाऽसि सत्यं तथा"
"दक्षो गीर्षु परं त्वमेव हनुमन् ! रामेण तन्नन्दितः" ॥ 32 ॥

"गङ्गा साऽपि सरिन्मणिस्तव तथा पुत्रीति मन्येऽत्र तां"
"गोदे ! तत्कथमङ्गनासु विमुखो यद्ब्रह्मचार्यस्म्यहम्"।
"त्वं श्रीमच्चरणो हि तच्चरणजा सा चेति सङ्कीर्तिता"
"गोदावर्यसि वाक्षु (गोषु) हन्त ! नितरां मातस्समर्थाऽसि तत्" ॥ 33 ॥

"गङ्गा सा चरणात् परं समुदिता मातस्त्वयि क्रीडितं
श्रीसीतासहितस्सलक्ष्मण इह स्वामी वितेने न वा ?"।
"आलिङ्गं तु ततान ते" "मम सकृच्छ्रीमान् परं तेऽसकृत्
मातस्ते महिमा महान् तव रसैरद्यापि सन्तुष्यति" ॥ 34 ॥

एवं नाम परस्परं हनुमतो गोदावरीश्रीनदी -
श्रेष्ठायाश्च दिने दिने विजयते संवादलीला परम्।
यत्र श्रीसरसार्थसन्मुनिगणैरानन्दिता पावनी (पावनम्)
भद्राद्रेरपि मध्यभूरिय(भूतल)मियं गोदावरीतीरतः॥ 35॥

गोदावरीयं परमा तपोभिः
यत्प्रान्ततो हन्त ! हृतस्वभार्यः।
आनीय तामङ्कगतां विधाय
वीर्याधिकः क्रीडति यत्र रामः॥ 36॥

भद्राचलाग्रे परमे पवित्रे
विद्राविताभ्यागतपापवर्गे।
निद्राविहीनो नितरां समिन्धे
भद्राय भूयो निजसज्जनानाम्॥ 37॥

पापानि दूरीकुरु मामकानि
तापान् हृदन्तश्शमयाऽभिजातान्।
श्रीपावमानेरतिहृद्य ! राम !
मां पावनञ्चापगया नय त्वम्॥ 38॥

सा स्त्रीधनं तत्स च मान एवं
मा मे मनः क्लेशय रामभद्र !।
स्त्रिया समेतो ननु सीतया त्वं
धनं परं मानय मानसं मे॥ 39॥

नामाचले नाम महावपुष्मान्
श्रीमानृसिंहं परिपूजयन् सन्।
रामार्थमत्राप्यचले पुरस्सन्
कामान् ददद्भाति समाभिनन्द्यः॥ 40॥

भद्रेतराणि मम तानि समानि दूरे
    विद्रावयन् विनतवातसुताभिनन्द्य !।
अद्राविहातिसुभगे विहृतिं विधत्से
    भद्राभिधावति न धावति मन्मनस्त्वत्॥ 41 ॥

अङ्के मैथिलकन्यकां निजदयां मूर्तीकृतामुद्वहन्
    अक्के (अत्के) लक्ष्मणमात्मवीर्यमिव तं श्रीचापबाणोज्ज्वलम्।
अग्रे पावनशोभनामितजलां पश्यंश्च गोदावरीं
    अन्तस्सन्ततमस्तु मे स भगवान् भद्राचलाधीश्वरः॥ 42 ॥

गोदावर्यभिधा नदी परिसरे पूर्णा सदर्णोभरैः
    मौलौ श्यामलवारिदो रघुपतिस्सीतातटित्संयुतः।
गावो दुग्धधरातिपीवरवरस्वोधोभरास्सर्वतः
    सन्तापं मम शान्तमान्तरमसौ कुर्यात् स भद्राचलः॥ 43 ॥

Check meter of the following stanza

रामे स्नानं कुर्वति कृष्णा
    सीतायां त्वं भासि सुवर्णा।
अनयोर्भूयो नर्मदता ते
    गोदावर्यथवैवं त्रिनदी॥ 44 ॥

गोदावरि ! त्वां धरणी विलोक्य
    तरङ्गिणीमात्मसुतावयस्याम्।
श्रीधन्विनव्ये नगरेऽवतीर्णा
    गोदेति नामाऽऽदरतो बभार॥ 45 ॥

शीतां येन स्पृशति भवतीं स्नानकालेषु रामः
    तेनैवासौ करजलभुवा हन्त रात्रौ कवाटम्।

हैद्राबाद्भाग्यवननृपतेस्ताडयामास भाग्यं
तस्यावर्ण्यं नगरमपि तद्येन भाग्याभिधानम् ॥ 46 ॥

दासार्थं भगवान् तुरुष्कभवनं यातोऽथ रात्रावयं
भ्रात्रा भृत्यजनाकृतिर्यदभवद्दत्वा धनं निर्गतः।
यत्तच्चिन्तयतो ममान्तरधुना सन्तापभारो महान्
किं कुर्वे न तदा बिडालशिशुरप्यासं न तद्दर्शनः ॥ 47 ॥

मेधावी स तुरुष्कभूपतिरभूत् सत्यं यतः पर्वते
सद्म स्वं रचयन् तथाविधमयं यत् पर्वतानां पतिम्।
तस्मिन्नाम ददर्श राममनघं देवं स्वयं सङ्गतं
भद्राख्याधरपर्वतादुपगतं श्रीरामदासप्रियम् ॥ 48 ॥

अङ्के कृत्वा स सीतां मम हृदयसखीं देवतां प्राणभूतां
लङ्केशोऽगाद्दशास्यस्स्फुरदतिभयदृग्विंशतिः कम्पदो मे।
कङ्केशे मोदसङ्गप्रद इह पुनरप्यागतस्तां किलेमां
अङ्के कृत्वा समिन्धे रघुपतिरनघो जानकी रामभद्रः ॥ 49 ॥

सीतायां हा ! हृतायां भगवति च गते सानुजे मत्तटस्थो
देशश्शून्यो ह्यभद्रो निखिलजनदृशां शोकदोऽभूत्सदैव (शोकदो यस्स एव)।
तस्मिन् सीतासमेते निजसहजयुते शैलमौलौ निविष्टे
सोऽयं भद्राचलस्सन्नचलमिह पदे भद्रमेवं विधत्ते ॥ 50 ॥

इत्थं गोदावरीयं सरिदमितरसाऽऽनन्दपूर्णा तरङ्गैः
नृत्तं (पृक्तं) व्यक्तं विधत्ते कलयति सततं तद्भवैश्शब्दजालैः।
आलोकारावमस्मै रघुकुलमणये तेन सेयं च सोऽयम्
साकं लोकेन नित्यं जयतु सुखपदं भद्रदे भद्रशैले ॥ 51 ॥

द्यावापृथिव्योश्शुभदो हि शैल -
स्तिष्ठन् पृथिव्यां दिवमात्मशीर्णा।
आक्रम्य वक्तीव निजस्वरूपं
लोकस्य च क्षेमविधानदक्षम्॥ 52॥

भद्राचलाधीश्वरसंयुतश्री -
गोदावरीतीरविहारभाजा।
तेनैव रामेण कृतैष दात्री
श्रीश्रीनिधिस्तत्र तु लेखिनीव॥ 53॥

श्यालेन (स्यालेन) वित्तपरिवञ्चितमानसस्य
बालेन कोसलभुवा (भुवः) परिपालितस्य।
कालेन राक्षसगणस्य कृतिः किलेयं
जालेन हृद्यवचसां परिमण्डिताङ्गी॥ 54॥

भद्रावनीधरशिरोवरभूषणस्य
निद्राधरानुजनिशाचरनेतृजेतुः।
विद्रावितानतभयङ्करपापराशेः
भद्राय पञ्च दशकानि भवन्तु वक्तुः॥ 55॥

॥ इति श्री भद्राचलपञ्चाशत् समाप्ता॥